


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2018; 4(8): 46-48
www.allresearchjournal.com
Received: 15-06-2018
Accepted: 19-07-2018

**डॉ0 संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर,
जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 संजीत कुमार झा**
नरौचधाम, भाया–रतनपुर,
जिला–दरभंगा, बिहार, भारत

# ज्योतिषदृष्ट्या विवाहेविचारणीय लतादिदशदोषास्तेषां परिहारः

**डॉ0 संजीत कुमार झा**

**प्रस्तावनाः**
**अथ लत्तादोषमुपजातिकयाऽऽह–**

झराहुर्णेन्दुसिताः स्वपृष्ठे भं सप्तगोजातिशरैर्मितं हि।
संलत्तयन्तेऽर्कशनीज्यभौमाः सूर्याष्टतर्काग्निमितं पुरस्तात्[1]।।

**अत्राऽयमाशयः–**
ज्ञेति। सप्त प्रसिद्धाः गावो नव जातयो द्वाविंशतिः शराः पञ्च एतैर्मितं भं स्वक्रान्तक्षत्राज्झराहुपर्णेन्दुमिताः स्वपृष्ठे संलत्तयन्ते। यथा बुधः सप्तमं राहुर्नवमं पूर्णेन्दुः पूर्णिमान्तचन्द्रो द्वाविंशम्। तच्च गतकृष्णपक्षे पञ्चमी–षष्ठीसंप्तमीनामन्यतमस्यां सम्भवति। शुक्रः पञ्चमं स्वपृष्ठे लत्तयतीत्यर्थः। अर्कशनीज्यभौमाः क्रमेण पुरस्तादये सूर्याष्टर्काग्निमितं संलत्तन्ते। यथा सूर्यः स्वक्रान्तनक्षत्राद् द्वादशः शनिरष्टमं गुरुः षष्ठं भौमस्तृतीयम् अग्रतो लत्तयतीत्यर्थः। यदाह नारदः – 'पुरतः पृष्ठतोऽर्काद्या दिनर्क्षे लत्तितञ्च यत्। अर्काकृतिगुणार्त्तुबाणष्टनवसङ्ख्यभम्।। इति। सूर्ये पुरतश्चन्द्रः पृष्ठत एव क्रमण भौमादयोऽपि पुरतः पृष्ठतश्च लत्तयन्तीत्यर्थः।
वराहोऽपि–

'सूर्यो द्वादशमृक्षं षष्टं गुरुरवनिजस्तृतीयं तु।
संलत्तयति दिवाकरपुत्रोऽष्टममग्रतः पादैः।।
पश्चाद् द्वाविंशतिभं पौर्णमचन्द्रस्तु पञ्चमं शुक्रः।
स्वभ्रानुरपि नवमं सप्तममृक्षं शशाौसुतः।।' इति।

प्रत्येकं वेधफलमाह स एव–

'रविलत्ता वित्तहरी नित्यं कौजी विनिर्दिशेम्नरणम्।
चान्द्री नाशं कुर्याद् बौधी नाशं वदत्येव।
सौरी मरणं कथयति बन्धुविनाशं वृहस्पतेर्लता।
मरणं लत्ता राहोः कार्यविनाशं भृगोर्वदन्तीति।''

नन्वग्रलता वा पृष्ठलत्ता वा वक्तव्या, किमिति द्वैरूप्यकथनम् अत्र समाधते केशवार्कः–

'इति सति द्युसदामभित्तने यदनुलत्तनमुक्तमृषिव्रजैः।
तदुडुपश्चिमपूर्वविभागयोरनधिकाधिकदोषविवक्षया।।' इति।

अनधिकः स्वल्पः। अत्र राहोः सदा वक्रित्वान्नवमगणनाक्रमेणैव ग्राह्या। यथाऽश्चिन्यां राहुराश्लेषां लत्तयति सम्मुखलत्तावादिमतेऽपि वक्रगामिना राहुणा सम्मुखमश्विनीरेवतीत्यादिगणनया विशतिभमाश्लेषैव न त्वन्यथा श्रयितव्यमिति साम्प्रदायिकाः।
अथ पातदोषं सुबोधंपथ्यार्ययाऽऽह–

हर्षणवैधृतिसाध्यव्यतिपातकगण्डशूलयोगानाम्।
अन्ते यन्नक्षत्रं पातेन निपातितं तत् स्यात्[2]।।

**आशयः–**
हर्षणवैधूतीति– व्यतिपातक इति स्वार्थे कः। हर्षणेत्यादिषड्योगानामन्ते यच्चन्द्रनक्षत्रं भवेत् तत्पातेन चण्डीशचण्डायुधाख्येन निपातितं स्यात्।

**यदाह त्रिविक्रमः–**

'साध्यहर्षशूलानि वैधूतिव्यतिपातयोः।
षड्भं गण्डस्य चान्ते स्यात् तत्पातेन निपातितम्।।' इति।

नरदेन प्रकारान्तरेणैतत्प्रकारसम्पादकः पातोऽभिहितः–

'सूर्यभात्सार्पपित्र्यान्त्यत्वाष्टँमित्रोडुविष्णुभे।
सूया दनिभेतावदश्विभात्पातदुष्ठभम्।।

**वसिष्ठेनापि–**

'रविभादहिपितृमित्रत्वाष्ट्रभहरिपौष्णभेषु गणितेषु।
आश्विनभादिन्दुयुतौ तावति वै पतति गणनया पातः।।
अयमपि पातो दोषश्चण्डीशचण्डायुधाह्वयो ज्ञेयः।
अखिलेषु मत्र्लेष्वपि वर्ज्यो यस्माद्विनाशदः कर्त्तुः।।'

इति पद्येषु यद्यपि हर्षणादीनामुपादानं नास्ति दयाप्यभिहिताश्लेषादिनक्षत्रसाहित्येन पाताभिधानात्तत्तुल्यसत्र्याकेष्वेव योगेषु ततसम्भवो जायते इति मत्वा हर्षणादीनामुक्तिः। यद्येवं व्यतीपातवैधृतिभ्यां हवीयभागघटिकात्मकाभ्यां तिथिनक्षत्राधिकं सर्वमेव सामान्यतो निन्द्यमुक्तं कत्किमत्रानयोर्योगयोः पुनर्ग्रहणेन ? उच्यते, यदा नक्षत्रयोगयोस्तुल्यकाले एव प्रवृत्तिनिवृतो तदाऽनयोर्योगयोरुपादानं व्यर्थमेव। यदा तु सूर्योदयादारभ्य कैयद्घटिकत्वं दर्शयोगयोर्नक्षत्रभागस्तु सूर्यादयादेव बहुकालव्यापी तदा पतासम्भवे तावत्कालस्यैव निषेधः। सामान्यवाक्यात्। पातसम्भवे हि सम्पूर्णस्य नक्षत्रास्य निषेधो यथा स्यादिति तयोर्दुष्टयोगयोः पुनरुपादानं कृतम्। एवमन्येष्वपि योगेषु पातसम्भवे सम्पूर्णनक्षत्रस्य निषेधो यथा स्यादिनयोर्दुष्टयोगयोः पुनरुपादानं त्याग इत्यर्थः। अयञ्च सर्वोऽपि विचार अकार्गलदोषेऽपि द्रष्टव्यः। यदा तु पातैकार्गलो न स्तस्तदा दुष्टयोगानामुकतादिमघटीत्यागः कर्त्तव्य इति।
अस्य सूर्यचन्द्रक्रान्तिसाम्यापरपर्यायं महापातदोषं शालिन्याऽऽह–

पञ्चस्याजौ गोमृगौ तौलिकुम्भो कन्यामीनौ कर्क्यली चापयुग्मे।
तत्रान्योन्यं चन्द्रभान्वोर्निरुक्तं क्रान्ते साम्यं नो शुभं मत्र्लेषु[3]।।

**अशयः–**
पञ्चेति। पञ्चास्याजौ सिंहमेषौ, अन्ये प्रसिद्धाः, एषु राशियुग्मेषु चन्द्रभान्वोः पाठक्रमेण व्युत्क्रमेण वा स्थितयोः क्रान्तिसाम्यं निरुक्तं तन्मत्र्लेषु नो शुभं स्यात्।
अत्र पञ्चास्याजावितत्येवमादीनां ग्रहणमुदाहरणदिक्प्रदर्शनार्थत्वात्सर्वथा सूर्यचन्द्रमसोः सायनयोर्योगः षड्राशिमितो द्वादशराशिमितो वा विवक्षितः। तदैव क्रान्तिसाम्यस्य सम्भवात्। अतः सम्मतिवाक्यस्यानवसरः। नन्वेतावन्त एव षड्राशियोगा द्वादशराशियोगा वा सम्भवन्तीति चेन्न। राश्यन्तावच्छेदस्थित्याधिकानामपि सम्भवात्। तथाहि प्रत्यंशकलाविकलान्तः–
स्थितत्वेनानन्तभेदसम्भवाच्च। अतः प्रागुक्तं व्याख्यानं ज्यायः। क्रान्तिसाम्यस्य च महापात इति नाम।

**एतस्य निन्द्यतामाह वसिष्ठः–**

'दोषो महापात इति प्रसिद्धः सवैधृतो हन्ति वधूं वरञ्च।
तं रक्षितुं लग्नगुणास्तवशक्ताः स्वबान्धवास्तेऽशनितोपघातम्।।

अशनिर्वजम्। नारदोऽपि– 'यस्मिन्दिने महापातस्तद्दिनं वर्जयेच्छुभे' इति। अत एव पतनात्पातः सकलशुभकर्मणामित्यन्वर्थतापि, सा च स्पष्टा सोमसिद्धानते–

'यच्छुभानां विनाशाय नदन्निव पतत्यम्।
व्यतीपातः प्रसिद्धोऽत्र संज्ञाभेदेन वैधृति[4]।।' इति।

महापातशब्दस्य रूढिस्तु रीन्दुक्रान्तिसाम्य एव न त्वन्येषां ग्रहाणां सन्तिसाम्ये। यथा जलजशब्दस्य रूढ़ि कमले न तु भेकादौ। क्रान्तिर्नाम ग्रहाणां दक्षिणोत्तरवृत्ते गमनम्। या च सूर्यस्य क्रान्तिः सा यदा चन्द्रक्रान्त्या तुल्या स्यात् स पातमध्यकालः। तत्रोत्सर्गतो रवीन्दुक्रान्त्योः सम नत्वं मुजसाम्ये सति भवति। भुजो नाम–
'त्रयूनं भुजः स्यात्त्रयधिकेन हीनं भार्द्ध च भार्द्धादधिकं विभार्द्धम्। न बाधिकेनोनितमर्कभञ्च इति लक्षणलक्षितः। तत्साम्यं तु सूर्याचन्द्रमसोर्योगे षड्राशितुलये द्वादशराशितुल्ये वा सति भवति। अत एव ग्रन्थकृता तादृशा योगा एव पठिताः। यदा तु एव भुजस्य न्यूनाधिकत्वं तदादिवौकसोरन्तरलिप्तिकोद्याद् गत्योर्वियोगेन हृतात्' इत्यादिना प्रकारेण ग्रहयुतिवत्तु भुजसाम्यमानेयम्। न तु भुसाम्यमेव क्रान्तिसाम्यसाधकं चेत् किं गणितग्रन्थोक्तेन बह्वायाससाध्येन पाताध्यायेन, उच्यते–

विक्षेपाय क्रमैकत्वे क्रान्तिर्विक्षेपसंयुता। दिग्भेदे वियुता भास्करस्य यथागता[5]।।''

इति सूर्यसिद्धानतवाक्यात्सूर्यव्यतिरिक्तानां ग्रहाणां शरसंस्कृता क्रान्तिः स्पष्टेत्युच्यते तादृशी चन्द्रकान्तिश्चेत्सूर्यक्रान्त्या समा यस्मिन्काले स्यात् स स्पष्टः पातमध्यकालः। तत्र तादृशक्रान्तिसाम्यानयनस्यातिकष्टसाध्यत्वात्तपद्धयोक्तिः सार्थिकैव। एवं ग्रन्थकर्त्रा सूर्याचन्द्रमसोः क्रान्तिसाम्यमेव दोषोऽभिहितः– ' पञ्चास्याजौ' इत्यादिकथनं किमर्थमिति चेदुच्यते। विनाशपातेन्दुमिहायनांशकैर्युतो रविः शीतकरञ्च गृह्यते। समापमक्रवे व्यतिपातवैधृताह्वयास्तदैक्ये रसभेऽर्कभे क्रमात्।।' इति भास्कराचार्योक्तिमत्रैकत्य सामान्यतः क्रान्तिसाम्यदिवसस्य शीघ्रोपस्थित्यर्थः मुजसाम्यप्रतिपादकत्वात्। नन्वेवं भुजहसाम्यमेव चेत्क्रान्तिसाम्योत्पादकं मवेत्तर्हि यत्र सूर्याचन्द्रयोः षड्राशिमितमन्तरं द्वादशराशिमितमन्तरं वा यथा मेषतुलयोर्मेषयोर्वा तत्रापि भुजसाम्यस्य तावदवस्थाक्रान्तिसाम्यं भवत्येवेति मासमध्ये महापातचतुष्टयं वक्तव्यं स्यात्। तत्कुतो हेतोनोक्तं ग्रन्थकृतेति चेत् ? अत्रोच्यते। योगोत्पन्ने हि पाते मुनिभिः स्नानदानादिकफलमुक्तम्। अतः स एव महापातो गृह्यते न तु वियोगोपन्ने उक्तम्। अतः स न गृह्यते।

**तदुक्तं वसिष्ठेन स्वसिद्धान्ते–**

'चक्रे चक्रार्द्धतुल्ये वा कियद्भागाधिकोणके।
सायनार्केन्दुयोगे चेत् तदा पातस्य सम्भवः।।
शुभमत्र्लकर्माणि लोकानां च विनाशयेत्।
स्नानदानादिकास्तत्र जपश्राद्धादिकाः क्रियाः।।
तदापि कुरुते मर्त्यः सुमहत्फलमश्नुते।
सूर्यग्रहे कुरुक्षेत्रे कोटिस्वर्णार्पणे फलम्।।
तत्फलं लभते पाते स्नानश्राद्धजपादिना।
उत्पत्तौ लक्षगुणितं भ्रमणे कोटिसत्र्णम्।।'
पातेथार्बुदसत्र्ग्यं पतिते दत्तमक्षयम्।' इति।

तथा सूर्यसिद्धानतेऽपि–
एकायनगतौ स्यातां सूर्याचन्द्रमसौ यदा। तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः।
तैपरीतायनगतौ चन्द्रकौ क्रान्तिलिप्तिकाः। समास्तदा व्यतीपातो भगणार्द्ध तयोर्युतौ।

तुल्यांशजालसम्पर्कात्तयोस्तु प्रवहात्ततः।
तादृक्क्रोधोद्भवो वह्निर्लोकाभावाय जायते।।'' इति।

इत एवान्तरोत्पन्नक्रान्तिसाम्ये महापातदोषा नास्त्येव। तदुक्तं गणेशदैवज्ञैः– 'पूर्वतत्स्यात्पातमध्यंद्वितीयं पूर्वेनोक्तं तद्यतो नातिदुष्टम्'[6] इति।

**सन्दर्भ– ग्रन्थ सूची :**


1. मुहूर्तचिन्तामणिः, विवाहप्रकरणम्– 59
2. तत्रैव– 60
3. तत्रैव– 61
4. याज्ञव0स्मृ0
5. मनु0स्मृ0
6. मुहूर्त्त0